ಜಾಗತೂಕತೆಯಿಂದ ಬಳಸಿ

ಪುಸ್ತಕದ ಸಂಖ್ಯೆ..... P-2665

201 S/3

MOUNT JOY,
Basavangudi,
BANGALORE CITY


॥ श्रीरस्तु ॥

नवसालपुराभिजनस्य

राधाकृष्णशास्त्रिणः

कृतिषु

6353



॥ नीतिपञ्चाशत् ॥

विजयताम् ॥

6353

NO. IX.

THE

NEETHIPANCHASATH.

BY

RADHAKRISHNA SASTRIAR,

OF

PUDUKOTA.

Printed at the Sri Vidya Press, Kumbakonam.

1894.

All Rights Reserved.

T 513
Aa 1353

॥ श्रीरस्तु ॥

॥ ईश्वरायनमः ॥

॥ अथ ॥

॥ नीतिपञ्चाशत् ॥

वाणी भजत गैर्वाणीं
LIBRARY
BANGALORE.

1 सर्वस्यादिं सर्वभूतान्तरस्थं
सर्वज्ञं तं सर्वशक्तिं महेशम्
नत्त्वा भक्त्या नीतिपञ्चाशदाख्यं
ग्रन्थं कुर्वे सर्वलोकात्मनीनम्

2 सर्वेशानस्सद्गतिर्दुर्गतिश्चा-
धर्मो धर्मस्त्वस्य जन्मान्तरं च
बन्धो मोक्षश्चात्मनोऽस्तीति सम्यक्
चित्ते गाढं निश्चयं सन्तनुष्व

3 स्वस्यानिष्टं दुस्सहं यो व्यतानीत्
तस्यानिष्टं चापि मा चिन्तय त्वम्
यात्वन्यस्यानिष्टसञ्चिन्तना, सा
स्वस्मा एवानिष्टदा पर्यवस्येत्

---

१. सर्वेश्वर , सद्गति, दुर्गति, धर्माधर्म, जन्मान्तर, बन्ध, मोक्षाणां आस्तत्वानिश्चयं कुर्वित्यर्थः ॥

4 दृष्ट्वाऽन्यस्यासह्यमत्याहितं त्वं
वन्हिज्वालाव्याप्तवत् तापभाक् सन्
धैर्यात्तूर्णं तन्निवृत्यै यतस्व
क्लेशानीशस्ते निरोद्धुं यतेत
5 विद्यां शीलं सुन्दरत्वं समृद्धिं
दृष्ट्वाऽन्येषां धत्स्व मोदं महान्तम्
ईर्ष्यान्धत्वं जात्वपि त्वं न विन्देः
नैवेर्ष्यातो हृन्मलं विद्यतेऽन्यत्
6 मर्त्येऽन्यस्मिन्नस्ति चेत् कोऽपि दोषः
तर्ह्येनं त्वं निर्जने प्राप्य देशे
दोषं तत्सम्भाव्यमप्यार्तिजालं
प्राबोध्यासुं मुक्तदोषं तनुष्व
7 नृणां श्रोत्रप्लोषकं चापि वाक्यं
प्रोक्तं सत् चेद्दोग्धि तेषां महार्थम्
अप्रोक्तंसत् चेदनिष्टावहं वा
गत्वा ब्रूयास्तत्प्रसह्यापि तूर्णम्
8 ईशस्यैते मूर्तिभेदा इति त्वं
मत्वा पूज्यान् सन्नम श्रद्धयैव
ईशायास्मच्चित्तगायेति मत्वा
सङ्गृह्णीया वन्दनं कल्पमन्यैः

---

१. कल्पं = रचितम् ॥

9 वाणीं ब्रूया नानृतां लीलयाऽपि
स्वोक्तेर्दाक्ष्यान्नापि [1]सत्यापयैनाम्
एका वाणी चेदसत्या प्रयुक्ता
सा कोटीस्तास्सञ्चिनोति स्वसिद्ध्यै [2]

10 दोषान् ब्रूया नेतरेषां परोक्षे
पैशुन्यं न प्राप्नुयाः पार्थिवेषु
नोगृह्णीया भीषयित्वा धनौघं
निर्नाथानां मूढ[3]भूयं गतानाम्

11 धूर्तैः स्वामिद्रोहिभिर्वञ्चकैश्च
स्तेनैर्हिंसातत्परैर्मद्यपैश्च
ईर्ष्यावद्भिस्सूचकैर्भ्रान्तचित्तैः
सङ्गच्छेथा नो बहुद्वेषभाग्भिः

12 वृद्धान् रुग्णानङ्गहीनान् कुरूपान्
विद्याशून्यांश्चाधिकाङ्गान् दरिद्रान्
जात्या नीचांश्चापि तद्दोषवादैः
तप्तस्वान्तान् मा [4]तथास्त्वं कदापि

---

१. सत्यापय = सत्यां कुरु ॥
२. ताः = असत्यवाणीः ॥
३. मूढभूयं = मूढत्वम् ॥
४. मातथाः = माकुरु ॥

13 आचार्ये वा व्याधिते वा पशौ वा
बाले वृद्धे भारवाहे स्त्रियां वा
आगच्छत्सु स्वाग्रतो मार्गमध्ये
दत्त्वा तेषां वर्त्म गच्छापसृत्य

14 इच्छां यच्छन्त्यप्यनारम्भकाले
पापा चेष्टा प्रक्रमे भीतिदात्री
अन्ते चार्तिं भूरिमेव प्रसूते
संमृश्यैवं बुद्धितो द्राक् त्यजैनाम्

15 पत्नीं पुष्पैश्चन्दनैरम्यवस्त्रैः
भूषाभिश्च प्रीणयाभीक्ष्णमेव
तस्यास्तोषे सम्भवेत् गेहसौख्यं
तोषाभावे नो भवेत् किञ्चनापि

16 गेहं प्राप्तां स्वस्नुषामात्मजावत्
प्रीत्याऽभीष्टापादनादाद्रियस्व
नोचेत्, क्लेशादश्रुमत्यां तु तस्यां
दग्धं दावग्रस्तवत् स्वत्कुलं स्यात्

17 पुत्रीं दत्त्वा सद्गुणायैव पुंसे
वारंवारं लालयेश्चेलमुख्यैः
पित्रोर्गेहादागतं वस्तु यद्वत्
तस्याश्चित्तं मोदयेन्नो तथाऽन्यत्

18 पत्न्यास्स्वस्य प्रीणनं सौख्यवृद्धयै
पुत्र्यास्स्वस्याः प्रीणनं श्रीसमृद्धयै
वंशोन्नत्यै प्रीणनं स्वस्रुषायाः
मातुस्सम्यक्प्रीणनं सर्वसिद्धयै
19 दीदांसेथा[1] अन्यदीये गुणौघे
मीमांसेथा[2] दोषबृन्दं स्वनिष्ठम्
शीशांसेथास्स्वां मतिं शास्त्रतत्वे[3]
बीभत्सेथास्सर्वदा पातकेभ्यः[4]
20 मैवस्तावीस्सद्गुणांस्तावकीनान्
अल्पीभावं प्राप्नुयुस्त्वन्नुताश्चेत्
अन्यैस्त्वेते प्रीतिपूर्वं स्तुताश्चेत्
अप्यल्पास्ते स्युः प्रकामं महान्तः
21 धर्मस्यार्थस्यापि कामस्य मुक्तेः
प्राप्तौ मुख्यं साधनं देहमेतम्
गोपायेस्त्वं यत्नतस्सावधानो
नाक्रामन्ति व्याधिभेदा यथाऽमुम्

---

१. दीदांसेथाः = ऋजूभव ॥ गुणानां दोषीकरणे मा प्रवर्तस्वेत्यर्थः ॥
२. मीमांसेथाः=जिज्ञासस्व ॥
३. शीशांसेथाः = निशितां कुरु ॥
४. बीभत्सेथाः = जुगुप्सस्व ॥

22 प्रातःप्रातर्घोटकारोहणंवा
व्यायामं वा पादतो वा प्रचारम्
कुर्याः, तेनत्वद्धपुर्दार्ढ्यमृच्छेत्
उत्पद्येत क्षुत्, विनश्येच्च रोगः
23 उष्णांशोर्वा शीतगोर्वा मयूखै
रस्पृष्टेनाव्यापृतेनापि वातैः
पङ्कैः कीटैर्जीर्णपर्णैश्च वारा
संव्याप्तेन स्नाहि मा व्याधिदेन
24 व्याहार्षीर्मा व्याधितस्योपकण्ठे
व्याधेर्भेदांस्तद्भवानार्तिभेदान्
रोगैस्तैस्तैः प्राङ्मृतस्यापि वार्तां
तन्मृत्युं[1] वा निश्चितं चापि वैद्यैः
25 प्रातः स्नानं वर्धकं देहकान्ते
रालस्यस्योच्छेदकं क्षुत्प्रदायि
आरोग्यस्यात्यन्तहेतुं निदानं
पुण्याचारस्यापि मैव प्रहासीः
26 विद्या धर्मो गौरवं कीर्तिसौख्ये
धैर्यं बन्धुस्नेह इष्टार्थसिद्धिः
जेतृत्वं चावाप्यते वित्तलाभात्
वित्तंतस्मादार्जयेर्यत्नतोऽपि

१. तन्मृत्युं = व्याधितस्यमृतिम् ॥

27 यद्वद्दीपादेकतः कोटिदीपा
उत्पद्यन्ते, तद्वदेवेह विद्या
वृद्धिं धत्ते शिष्यपारंपरीतो
विद्यार्थिभ्यस्तत्सदा देहि विद्याम्

28 प्रायो वन्ध्यास्वैरिणीभिर्विहीने
पुत्रीमात्रोत्पत्तिसंवर्जिते च
कुष्ठप्रख्यैर्व्याधिमुख्यैर्विहीने
वंशे जातां कन्यकामुद्वहस्व

29 मृत्युं मत्यास्सत्यशत्रुं सगर्भ्यं
मिथ्यावाचो मातरं पातकस्य
तातं स्तेयस्यापि दारिद्र्यदूतं
द्यूतं हेतुं संयुगस्य त्यजाशु

30 पुण्याकाङ्क्षैः पापदूरैर्दयाढ्यैः
धीरैः प्रौढैर्नित्यतृप्तैर्विरागैः
विद्यावद्भिश्शुद्धचित्तैस्सुशान्तैः
संसृज्येथास्सर्वदा साधुलोकैः

31 षिद्वस्नेहं मद्यमांसादिसक्तिं
चौर्यं रोगं प्राणिहिंसामसत्यम्
वंशोच्छेदं चात्मनो द्रव्यनाशं
यच्छन्तं द्राक् जारभावं जहाहि

32 उत्पाद्यन्ते व्याधयोऽहस्सु सुप्त्या
नक्तंस्वापो हन्यते रोगहारी
आलस्यं चोद्भाव्यते सर्वविघ्नः
तस्मात् त्याज्या सा त्वया यत्नतोऽपि

33 रात्रिस्वापं मा निरुन्ध्याः क्रियाभिः
तेनैव स्यादूर्जितं देहसौख्यम्
पश्चार्द्धेषु स्वापतोऽपि क्षपाणां
स्वापोऽत्यर्थं पूर्वरात्रेषु पथ्यः

34 मातापित्रोः पालनं वृद्धतायां
आचार्येभ्यो दक्षिणाद्रव्यदानम्
लोभान्नोचेदाचरेस्तर्हि ते स्यात्
आकिञ्चन्यं भूरि जन्मान्तरेषु

35 मा त्वं नावीर्धर्मजातं स्वकीयं
मा निन्दान्यैः प्रीतितो दत्तमन्नम्
मा विस्मार्षीरन्यकृतोपकारं
लीनः श्रौषीर्मा रहस्यं परेषाम्

36 कोपोद्रेकोत्पादकश्चापि मन्तुः
भूपालेनाकारि चेत् ते महीयान्
निष्कोपस्सन् तं यथैव क्षमेथाः
तद्वत् पित्रोस्सङ्क्षमस्वापराधान्

37 धैर्यं दानं वाक्पटुत्वं महत्त्वं
गंभीरत्वं चेशभक्तिं प्रियोक्तिम्
उत्साहित्वं चापि बन्धुप्रियत्वं
चैतान् यत्नात् सद्गुणानाश्रयेथाः
38 सूपापूपैस्स्वादुना पायसेन
प्राज्येनाज्येनापि दध्ना च भक्ष्यैः
संपन्नं चाप्योदनं याचनेन
प्राप्तं चेत्, तद्धिद्धि तुल्यं विषेण
39 याच्ञाजन्यां दीनतामन्तरेण
स्वायासोत्थैः कर्ममात्रैरवाप्ता
षड्भिर्हीना स्वादभेदैर्यवागू-
रप्यत्यन्तं प्रीतिदा मानभाजाम्
40 कोपं चिन्तां वा जुगुप्सामविन्दन्
प्रीतस्वान्तः फुल्लवक्त्रारविन्दः
मध्येमध्ये तीर्थपानं न कुर्वन्
आसीनस्सन् भुङ्क्ष्व भोज्यं विशुद्धम्
41 मादाः पुत्रीं वंशहीनाय पुंसे
दुर्वृत्तायानन्तरोगार्दिताय
निर्वीर्यायादक्षिणायालसाय
न्यूनाङ्गायावार्यदारिद्र्यभाजे

42 सल्लापोऽन्यैः पूरुषैर्गेहकृत्य-
त्यागो गेहाद्वर्त्तनं बाह्यवेद्याम्
पत्युश्चाज्ञालङ्घनं ग्राम्यवार्ता
वर्ज्यानि द्राक् स्त्रीभिरेतानि पञ्च

43 विश्वासस्य द्रोहतो मानहानेः
उत्कोचस्यादानतो वा सभायाम्
द्रुर्वादाद्वा स्तेयतोवाऽनृताद्वा
नस्यात्ते भीः, नो बिभीया ऋणाच्चेत्

44 भूमौ लग्नो मारुतो वात्यशुद्धः
तस्यादानान्नासयोच्छ्वासकाले
त्वद्देहस्थं रक्तमायात्यशुद्धिं
तस्माद्रोगः स्यादतश्शेष्व मञ्चे

45 ताते मातर्यात्मजे सोदरे वा
सख्यौ भृत्ये बन्धुवर्गे श्रिते वा
दारिद्र्येणातीव सीदत्सु वित्त-
त्यागोऽन्येभ्यस्ते फलं नो सुवीत

46 स्वप्नप्रायायेन्द्रजालोपमाया-
नित्यायान्ते नीरसायाहिताय

सौख्याय स्त्रीभोगजाय स्पृहावान्
नान्यस्त्रीभिस्सङ्गमात्पातकी स्याः

47 अत्युष्णंवाऽत्यन्तशीतं विगन्धि
प्राचीनं वा हस्तनिर्लोडितं वा
स्पृष्टं नीचैः खादितं श्वादिभिर्वा
मामुञ्जीथा वस्तु भोज्यं कदापि

48 मादा वित्तं कूटसाक्षित्वभाजे
नैष्किञ्चन्यस्याभिनेत्रे विटाय
मित्रद्रोग्ध्रे चाकृतज्ञाय पुंसे
नित्याचारत्यागिने दांभिकाय

49 श्रेष्ठास्ते स्युर्येविदुश्शास्त्रतत्त्वं
तेभ्यःश्रेष्ठा ये तथैवाचरन्ति
तेभ्योऽपि स्युर्ब्रह्मनिष्ठा वरिष्ठा
श्शत्रौ मित्रे चाप्यभिन्ना महान्तः

50 दौर्गुण्यस्यारोपणं शात्रवेऽपि
स्वप्नेप्यन्यस्त्रीरतेस्सङ्कथां च
स्निग्धैर्नर्मोक्तिष्वपि ग्राम्यवाचं
साध्व्याः पत्न्याः क्लेशनं चापि जह्याः

51 ईशाधीनश्चाल्पविज्ञानवांस्त्वं
कर्तुं शक्तो नात्मनीनं विबुध्य
तस्मादीशं सम्प्रपद्यस्व भक्त्या
संरक्षेत् त्वां सोऽनुकम्पापयोधिः

॥ नीतिपञ्चाशत् सम्पूर्णा ॥

---

१. आत्मनीनं = आत्मनेहितं ॥